# umAtrishatI with list of 300 names

# શ્રીઉમાત્રિશતીસહિતં નામાવલી

## Document Information

Text title : umAtrishatievamnAmavalI by Ganapati Muni

File name : umAtrishatievamnAmAvalI.itx

Category : shatInAmAvalI, devii, pArvatI, nAmAvalI, gaNapati-muni, ramaNa-maharShi, devI, trishatI

Location : doc_devii

Author : Ganapati Muni with Ramana Maharshi

Transliterated by : DPD

Proofread by : DPD

Description-comments : From The Collected Works of Vasishtha Kavyakantha Ganapati Muni Vol 1

Latest update : November 24, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# શ્રીઉમાત્રિશતીસહિતં નામાવલી

ઉમા હૈમવતિ દેવી મહાદેવી મહેશ્વરી ।
અજા ધૂમ્રા સુરૂપૈકા વિશ્વસૂર્વિશ્વધારિણી ॥ ૧॥

શિવા ભગવતી ભદ્રા પ્રકૃતિર્વિકૃતિઃ કૃતિઃ ।
અનન્તાઽનાદિરવ્યક્તા દુર્ગપારા દુરાત્યયા ॥ ૨॥

સ્વધા સ્વાહા સુધા પુષ્ટિઃ સુખા સોમસ્વરુપિણી ।
તુષ્ટિર્નિદ્રા વિષ્ણુમાયા જાતિર્ધીશ્ચેતના ચિતિઃ ॥ ૩॥

માતા શાન્તિઃ ક્ષમા શ્રદ્ધા હ્રીર્વૃત્તિર્વ્યાપિની સ્મૃતિઃ ।
શક્તિસ્તૃષ્ણા ક્ષુધા ભ્રાન્તિઃ કાન્તિઃ છાયા રમા દયા ॥ ૪॥

ભવાની રાજસી સૃષ્ટિર્મૃડાની સાત્ત્વિકી સ્થિતિઃ ।
રુદ્રાણી તામસી મૃત્યુઃ શર્વાણી ત્રિગુણા પરા ॥ ૫॥

કૃષ્ણા લક્ષ્મીઃ કામધેનુરાર્યા દાક્ષાયણી સતી ।
ગણેશજનનિ દુર્ગા પાર્વતિ બ્રહ્મચારિણી ॥ ૬॥

ગમ્ભીરનાદવદ્ઘણ્ટા કૂષ્માણ્ડા ષણ્મુખપ્રસૂઃ ।
કાત્યાયની કાલરાત્રિર્ગૌરી સિદ્ધિપ્રદાયિનિ ॥ ૭॥

અપર્ણા તાપસી બાલા કન્યા કાન્તારચારિણી ।
મહર્ષિસ્તુતચારિત્રા ત્રિનેત્રાર્ધાઙ્ગભાગિની ॥ ૮॥

રમણીયતમા રાજ્ઞી રજતાદ્રિનિવાસિની ।
ગીર્વાણમૌલિમાણિક્યનીરાજિતપદામ્બુજા ॥ ૯॥

સર્વાગમસ્તુતોપાસ્યા વિદ્યા ત્રિપુરસુન્દરી ।
કમલાત્મા છિન્નમસ્તા માતઙ્ગી ભુવનેશ્વરી ॥ ૧૦॥

તારા ધૂમાવતિ કાલી ભૈરવી બગલામુખી ।
અનુલ્લઙ્ઘ્યતમા સન્ધ્યા સાવિત્રી સર્વમઙ્ગલા ॥ ૧૧॥

છન્દઃ સવિત્રી ગાયત્રી શ્રુતિર્નાદસ્વરૂપિણી ।
કીર્તનીયતમા કીર્તિઃ પાવની પરમામ્બિકા ॥ ૧૨॥

ઉષા દેવ્યરુષી મૈત્રી ભાસ્વતી સૂનૃતાર્જુની ।
વિભાવરી બોધયિત્રી વાજિની વાજિનીવતી ॥ ૧૩॥

રાત્રિઃ પયસ્વતી નમ્યા ધૃતાચી વારુણી ક્ષપા ।
હિમાનિવેશિની રૌદ્રા રામા શ્યામા તમસ્વતી ॥ ૧૪॥

કપાલમાલિની ઘોરા કરાલાખિલમોહિની ।
બ્રહ્મસ્તુતા મહાકાલી મધુકૈટભનાશિની ॥ ૧૫॥

ભાનુપાદાઙ્ગુલિર્બ્રહ્મપાદા પાશ્યૂરુજઙ્ઘિકા ।
ભૂનિતમ્બા શક્રમધ્યા સુધાકરપયોધરા ॥ ૧૬॥

વસુહસ્તાઙ્ગુલિર્વિષ્ણુદોઃસહસ્રા શિવાનના ।
પ્રજાપતિરદા વહ્નિનેત્રા વિત્તેશનાસિકા ॥ ૧૭॥

સન્ધ્યાભ્રૂયુગલા વાયુશ્રવણા કાલકુન્તલા ।
સર્વદેવમયી ચણ્ડી મહિષાસુરમર્દિની ॥ ૧૮॥

કૌશિકી ધૂમ્રનેત્રઘ્ની ચણ્ડમુણ્ડવિનાશિની ।
રક્તબીજપ્રશમની નિશુમ્ભમદશોષિણી ॥ ૧૯॥

શુમ્ભવિધ્વંસિની નન્દા નન્દગોકુલસમ્ભવા ।
એકાનંશા મુરારાતિભગિની વિન્ધ્યવાસિની ॥ ૨૦॥

યોગીશ્વરી ભક્તવશ્યા સુસ્તની રક્તદન્તિકા ।
વિશાલા રક્તચામુણ્ડા વૈપ્રચિત્તનિષૂદિની ॥ ૨૧॥

શાકમ્ભરી દુર્ગમઘ્ની શતાક્ષ્યમૃતદાયિની ।
ભીમૈકવીરા ભીમાસ્યા ભ્રામર્યરૂણનાશિની ॥ ૨૨॥

બ્રહ્માણી વૈષ્ણવીન્દ્રાણી કૌમારી સૂકરાનના ।
માહેશ્વરી નારસિંહી ચામુણ્ડા શિવદૂતિકા ॥ ૨૩॥

ગૌર્ભૂર્મહીદ્યૌરદિતિર્દેવમાતા દયાવતી ।
રેણુકા રામજનની પુણ્યા વૃદ્ધા પુરાતની ॥ ૨૪॥

ભારતી દસ્યુજિન્માતા સિદ્ધા સૌમ્યા સરસ્વતી ।
વિદ્યુદ્ધ્વજેશ્વરી વૃત્રનાશિની ભૂતિરચ્યુતા ॥ ૨૫॥

દણ્ડિની પાશિની શૂલહસ્તા ખટ્વાઙ્ગધારિણી ।
ખડ્ગિની ચાપિની બાણધારિણી મુસલાયુધા ॥ ૨૬॥

સીરાયુધાઙ્કુશવતી શઙ્ખિની ચક્રધારિણી ।
ઉગ્રા વૈરોચની દીપ્તા જ્યેષ્ઠા નારાયણી ગતિઃ ॥ ૨૭॥

મહીશ્વરી વહ્નિરૂપા વાયુરૂપાઽમ્બરેશ્વરી ।
દ્યુનાયિકા સૂર્યરૂપા નીરૂપાખિલનાયિકા ॥ ૨૮॥

રતિઃ કામેશ્વરી રાધા કામાક્ષી કામવર્ધિની ।
ભણ્ડપ્રણાશિની ગુપ્તા ત્ર્યમ્બકા શમ્ભુકામુકી ॥ ૨૯॥

અરાલનીલકુન્તલા સુધાંશુસુન્દરાનના ।
પ્રફુલ્લપદ્મલોચના પ્રવાલલોહિતાધરા ॥ ૩૦॥

તિલપ્રસૂનનાસિકા લસત્કપોલદર્પણા ।
અનઙ્ગચાપઝિલ્લિકા સ્મિતાપહાસ્યમલ્લિકા ॥ ૩૧॥

વિવસ્વદિન્દુકુણ્ડલા સરસ્વતીજિતામૃતા ।
સમાનવર્જિતશ્રુતિઃ સમાનકમ્બુકન્ધરા ॥ ૩૨॥

અમૂલ્યમાલ્યમણ્ડિતા મૃણાલચરુદોર્લતા ।
કરોપમેયપલ્લવા સુરોપજીવ્યસુસ્તની ॥ ૩૩॥

બિસપ્રસૂનસાયકક્ષુરાભરોમરાજિકા ।
બુધાનુમેયમધ્યમા કટીતટીભરાલસા ॥ ૩૪॥

પ્રસૂનસાયકાગમપ્રવાદચુઞ્ચુકાઞ્ચિકા ।
મનોહરોરુયુગ્મકા મનોજતૂણજઙ્ઘિકા ॥ ૩૫॥

ક્વણત્સુવર્ણહંસકા સરોજસુન્દરાઙ્ઘ્રિકા ।
મતઙ્ગજેન્દ્રગામિની મહાબલા કલાવતી ॥ ૩૬॥

શુદ્ધા બુદ્ધા નિસ્તુલા નિર્વિકારા
સત્યા નિત્યા નિષ્ફલા નિષ્કલઙ્કા ।
અજ્ઞા પ્રજ્ઞા નિર્ભવા નિત્યમુક્તા
ધ્યેયા જ્ઞેયા નિર્ગુણા નિર્વિકલ્પા ॥ ૩૭॥

આગમાબ્ધિલોડનેન સારભૂતમાહૃતં

શૈલપુત્રિકભિધાશતત્રયામૃતં મયા।
યે ભજન્તિ સૂરયસ્તરન્તિ તે મહદ્ભયં
રોગજં ચ વૈરિજં ચ મૃત્યુજં સર્વજમ્ ॥ ૩૮॥

॥ ઇતિ શ્રીભગવન્મહર્ષિરમણાન્તેવાસિનો વાસિષ્ઠસ્ય
નરસિંહસૂનોઃ ગણપતેઃ કૃતિઃ ઉમાત્રિશતી સમાપ્તા ॥

અનુષ્ટુબ્વૃત્તમ્ (૧-૩૬) । ઇન્દ્રવજ્રા (૩૭) । તૂણકમ્ (૩૮) ।

---

ઉમાત્રિશતી નામાવલી
ઉમા । હૈમવતિ । દેવી । મહાદેવી । મહેશ્વરી ।
અજા । ધૂમ્રા । સુરૂપા । એકા । વિશ્વસૂઃ । વિશ્વધારિણી ॥ ૧-૧૧॥

શિવા । ભગવતી । ભદ્રા । પ્રકૃતિઃ । વિકૃતિઃ । કૃતિઃ ।
અનન્તા । અનાદિ । અવ્યક્તા । દુર્ગપારા । દુરાત્યયા ॥ ૧૨-૨૨॥

સ્વધા । સ્વાહા । સુધા । પુષ્ટિઃ । સુખા । સોમસ્વરુપિણ્ । તુષ્ટિઃ ।
નિદ્રા । વિષ્ણુમાયા । જાતિઃ । ધીઃ । ચેતના । ચિતિઃ ॥ ૨૩-૩૫॥

માતા । શાન્તિઃ । ક્ષમા । શ્રદ્ધા । હ્રીઃ । વૃત્તિઃ । વ્યાપિની ।
સ્મૃતિઃ । શક્તિઃ । તૃષ્ણા । ક્ષુધા । ભ્રાન્તિઃ । કાન્તિઃ ।
છાયા । રમા । દયા ॥ ૩૫-૫૧॥

ભવાની । રાજસી । સૃષ્ટિઃ । મૃડાની । સાત્ત્વિકી । સ્થિતિઃ ।
રુદ્રાણી । તામસી । મૃત્યુઃ । શર્વાણી । ત્રિગુણા । પરા ॥ ૫૨-૬૩॥

કૃષ્ણા । લક્ષ્મીઃ । કામધેનુઃ । આર્યા । દાક્ષાયણી । સતી ।
ગણેશજનનિ । દુર્ગા । પાર્વતિ । બ્રહ્મચારિણી ॥ ૬૪-૭૩ ॥

ગમ્ભીરનાદવદ્ઘણ્ટા । કૂષ્માણ્ડા । ષણ્મુખપ્રસૂઃ ।
કાત્યાયની । કાલરાત્રિઃ । ગૌરી । સિદ્ધિપ્રદાયિનિ ॥ ૭૪-૮૦॥

અપર્ણા । તાપસી । બાલા । કન્યા । કાન્તારચારિણી ।
મહર્ષિસ્તુતચારિત્રા । ત્રિનેત્રાર્ધાઙ્ગભાગિની । ॥ ૮૧-૮૭॥

રમણીયતમા । રાજ્ઞી । રજતાદ્રિનિવાસિની ।
ગીર્વાણમૌલિમાણિક્યનીરાજિતપદામ્બુજા ॥ ૮૭-૯૧ ॥

સર્વાગમસ્તુત । ઉપાસ્યા । વિદ્યા । ત્રિપુરસુન્દરી । ।

કમલાત્મા । છિન્નમસ્તા । માતઙ્ગી । ભુવનેશ્વરી ॥ ૯૨-૯૯॥

તારા । ધૂમાવતિ । કાલી । ભૈરવી । બગલામુખી ।
અનુલ્લઙ્ઘ્યતમા । સન્ધ્યા । સાવિત્રી । સર્વમઙ્ગલા ॥ ૧૦૦-૧૦૮ ॥

છન્દઃ । સવિત્રી । ગાયત્રી । શ્રુતિઃ । નાદસ્વરૂપિણી ।
કીર્તનીયતમા । કીર્તિઃ । પાવની । પરમા । અમ્બિકા ॥ ૧૦૯-૧૧૮॥

ઉષા । દેવ્યરુષી । મૈત્રી । ભાસ્વતી । સૂનૃતા । અર્જુની ।
વિભાવરી । બોધયિત્રી । વાજિની । વાજિનીવતી ॥ ૧૧૯-૧૨૮ ॥

રાત્રિઃ । પયસ્વતી । નમ્યા । ધૃતાચી । વારુણી । ક્ષપા ।
હિમાનિવેશિની । રૌદ્રા । રામા । શ્યામા । તમસ્વતી ॥ ૧૨૯-૧૩૯ ॥

કપાલમાલિની । ઘોરા । કરાલા । અખિલમોહિની ।
બ્રહ્મસ્તુતા । મહાકાલી । મધુકૈટભનાશિની ॥ ૧૪૦-૧૪૬ ॥

ભાનુપાદાઙ્ગુલિઃ । બ્રહ્મપાદા । પાશ્યૂરુજઙ્ઘિકા ।
ભૂનિતમ્બા । શક્રમધ્યા । સુધાકરપયોધરા ॥ ૧૪૭-૧૫૨ ॥

વસુહસ્તાઙ્ગુલિઃ । વિષ્ણુદોઃસહસ્રા । શિવાનના ।
પ્રજાપતિરદા । વહ્નિનેત્રા । વિત્તેશનાસિકા ॥ ૧૫૩-૧૫૮ ॥

સન્ધ્યા-ભ્રૂયુગલા । વાયુશ્રવણા । કાલકુન્તલા ।
સર્વદેવમયી । ચણ્ડી । મહિષાસુરમર્દિની ॥ ૧૫૯-૧૬૪ ॥

કૌશિકી । ધૂમ્રનેત્રઘ્ની । ચણ્ડમુણ્ડવિનાશિની ।
રક્તબીજપ્રશમની । નિશુમ્ભમદશોષિણી ॥ ૧૬૫-૧૬૯ ॥

શુમ્ભવિધ્વંસિની । નન્દા । નન્દગોકુલસમ્ભવા ।
એકાનંશા । મુરારાતિભગિની । વિન્ધ્યવાસિની ॥ ૧૭૦-૧૭૫ ॥

યોગીશ્વરી । ભક્તવશ્યા । સુસ્તની । રક્તદન્તિકા ।
વિશાલા । રક્તચામુણ્ડા । વૈપ્રચિત્તનિષૂદિની ॥ ૧૭૬-૧૮૨ ॥

શાકમ્ભરી । દુર્ગમઘ્ની । શતાક્ષી । અમૃતદાયિની ।
ભીમા । એકવીરા । ભીમાસ્યા । ભ્રામરી । અરુણનાશિની ॥ ૧૮૩-૧૯૧॥

બ્રહ્માણી । વૈષ્ણવી । ઇન્દ્રાણી । કૌમારી । સૂકરાનના ।
માહેશ્વરી । નારસિંહી । ચામુણ્ડા । શિવદૂતિકા ॥ ૧૯૨-૨૦૦ ॥

ગૌઃ । ભૂઃ । મહી । દ્યૌઃ । અદિતિઃ । દેવમાતા । દયાવતી ।
રેણુકા । રામજનની । પુણ્યા । વૃદ્ધા । પુરાતની ॥ ૨૦૧-૨૧૨ ॥

ભારતી । દસ્યુજિન્માતા । સિદ્ધા । સૌમ્યા । સરસ્વતી ।
વિદ્યુત્ । વાજેશ્વરી । વૃત્રનાશિની । ભૂતિઃ । અચ્યુતા ॥ ૨૧૩-૨૨૨॥

દણ્ડિની । પાશિની । શૂલહસ્તા । ખટ્વાઙ્ગધારિણી ।
ખડ્ગિની । ચાપિની । બાણધારિણી । મુસલાયુધા ॥ ૨૨૩-૨૩૦ ॥

સીરાયુધા । અઙ્કુશવતી । શઙ્ખિની । ચક્રધારિણી ।
ઉગ્રા । વૈરોચની । દીપ્તા । જ્યેષ્ઠા । નારાયણી । ગતિઃ ॥ ૨૩૧-૨૪૦ ॥

મહીશ્વરી । વહ્નિરૂપા । વાયુરૂપા । અમ્બરેશ્વરી ।
દ્યુનાયિકા । સૂર્યરૂપા । નીરૂપા । અખિલનાયિકા ॥ ૨૪૧-૨૪૮ ॥

રતિઃ । કામેશ્વરી । રાધા । કામાક્ષી । કામવર્ધિની ।
ભણ્ડપ્રણાશિની । ગુપ્તા । ત્ર્યમ્બકા । શમ્ભુકામુકી ॥ ૨૪૯-૨૫૭॥

અરાલનીલકુન્તલા । સુધાંશુસુન્દરાનના ।
પ્રફુલ્લપદ્મલોચના । પ્રવાલલોહિતાધરા ॥ ૨૫૮-૨૬૧ ॥

તિલપ્રસૂનનાસિકા । લસત્કપોલદર્પણા ।
અનઙ્ગચાપઝિલ્લિકા સ્મિતાપહાસ્યમલ્લિકા ॥ ૨૬૨-૨૬૫ ॥

વિવસ્વદિન્દુકુણ્ડલા । સરસ્વતીજિતામૃતા ।
સમાનવર્જિતશ્રુતિઃ । સમાનકમ્બુકન્ધરા ॥ ૨૬૬-૨૬૯ ॥

અમૂલ્યમાલ્યમણ્ડિતા । મૃણાલચરુદોર્લતા ।
કરોપમેયપલ્લવા । સુરોપજીવ્યસુસ્તની ॥ ૨૭૦-૨૭૩ ॥

બિસપ્રસૂનસાયકક્ષુરાભરોમરાજિકા ।
બુધાનુમેયમધ્યમા । કટીતટીભરાલસા ॥ ૨૭૪-૨૭૬ ॥

પ્રસૂનસાયકાગમપ્રવાદચુઞ્ચુકાઞ્ચિકા ।
મનોહરોરુયુગ્મકા । મનોજતૂણજઙ્ઘિકા ॥ ૨૭૭-૭૯ ॥

ક્વણત્સુવર્ણહંસકા । સરોજસુન્દરાઙ્ઘ્રિકા ।
મતઙ્ગજેન્દ્રગામિની । મહાબલા । કલાવતી ॥ ૨૮૦-૨૮૪ ॥

શુદ્ધા । બુદ્ધા । નિસ્તુલા । નિર્વિકારા ।
સત્યા । નિત્યા । નિષ્ફલા । નિષ્કલઙ્કા ।

અજ્ઞા । પ્રજ્ઞા । નિર્ભવા । નિત્યમુક્તા
ધ્યેયા । જ્ઞેયા । નિર્ગુણા । નિર્વિકલ્પા ॥ ૨૮૫-૩૦૦ ॥

From the complete volume 1 of collected works of Ganapati Muni
Encoded and proofread byDPD

---

*umAtrishatI with list of 300 names*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*